दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढ़कृष्णाष्टमी
आषाढः 24 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-256 | 1 | जुलाई 08, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 निरमण्ड-गड़सा-उपत्यकायां मेघविस्फोटः, समेजक्षेत्रे आगते प्रबाहे (बाढ़) अस्थायी-सेतुः प्रक्षालितः

3 नौणी-विश्वविद्यालये प्रो. प्रेमलालगौतमः 'साइटेशन ऑफ ऑनर' इति सम्मान-पत्रेण सम्मानितः

5 २०२६ तमस्य वर्षस्य अगस्तमासस्य ३० दिनाङ्के यूनेस्को-क्लब-ऑफ-दरभङ्गा-संस्थया "राधाकृष्णरूपसज्जा-प्रतियोगिता" आयोजयिष्यते

## वैश्विक-शान्ति-स्थिरतायै भारत-इण्डोनेशियादेशयोः रणनीतिक-संधिसुदृढीकरणाय प्रधानमन्त्रिणः नरेन्द्रमोदिनः आह्वानम्; जकार्तायां इण्डोनेशियासंसदः संयुक्त सत्रं सम्बोधितवान्



हिमसंस्कृतवार्ता। प्रधानमन्त्रिणा नरेन्द्रमोदिना जकार्तानगरे इण्डोनेशिया-देशस्य राष्ट्रपतिना प्रबोवो सुबियान्तो इत्यनेन सह द्विपक्षीयसम्बन्धं सुदृढं कर्तुं सहैव द्वयोः देशयोः व्यापक रणनीतिकसंधेः कृते नूतनऊर्जा प्रदातुं प्रतिनिधिमण्डल-स्तरीयं विचारविनीनमयम् अकारि। द्वयोः राजनेत्रोः समुपस्थितौ रक्षा, महत्वपूर्ण-खनिज-कृषि-सामुद्रिक-सहयोग-नवोन्मेषी-प्रौद्योगिकीत्यादिषु विविध-क्षेत्रेषु अनेकानि संधि-पत्राणि हस्ताक्षरीकृतानि ।उभाभ्यां नेतृभ्याम् जकार्ता-नगरे भारतीय-प्रबन्ध-संस्थान-बेंगलूरु इत्यस्य एकां नूतनां शाखां संस्थापयितुं सहमतिः च व्यक्तीकृता। सम्भाषणावधौ उभाभ्यां भारत-इण्डोनेशिया सुदृढीकरणाय स्वकीया प्रतिबद्धता पुनः संशोधिता। व्यापक रणनीतिक संधिजकार्ता-नगरे राष्ट्रपतिना प्रबोवो इत्यने सह संयुक्त-वार्ताहरसम्मेलनं सम्बोधयन् प्रधानमन्त्री मोदी प्रावोचत् यत् परस्परं वर्धमानेन विश्वासेन रक्षा, सुरक्षा तथा सामुद्रिक-क्षेत्रेषु अस्मदीय पारस्परिक सहयोगः सुदृढः जातः अस्ति।

### इण्डोनेशिया-देशस्य सर्वोच्च-नागरिक सम्मानेन 'बिन्तङ्ङ्ग आदिपूर्ण' इति उपाधिना अलङ्कृतः प्रधानमन्त्री नरेन्द्रमोदी

इण्डोनेशिया-देशस्य सर्वोच्च-नागरिक सम्मानेन 'बिन्तङ्ङ्ग आदिपूर्ण' इति उपाधिना अलङ्कृतः प्रधानमन्त्री नरेन्द्रमोदी अस्य गौरवपूर्णक्षणस्य कृते इण्डोनेशिया-सर्वकारं प्रति स्वकीयां गभीरां कृतज्ञतां प्राकटयत्। तेन अयं प्रतिष्ठित पुरस्कारः भारतस्य सार्धशतकोटि-जनेभ्यः समर्पितः ।इतः प्राक्, प्रधानमन्त्री नरेन्द्रमोदी इण्डोनेशिया-देशस्य राष्ट्रपति-प्रासादे 'इस्ताना मेरदेका' इत्यत्र औपचारिक-राजकीय-सम्माननं प्राप्तवान् ।गत अपराह्णे प्रधानमन्त्री नरेन्द्रमोदी जकार्ता-नगरे इण्डोनेशिया-संसदः संयुक्त-सत्रं सम्बोधितवान्। प्रधानमन्त्री सविशेष न्यगादीत् यत् वैश्विक आतङ्कवादस्य प्रतिकाराय उभे अपि राष्ट्रे 'संयुक्त-कार्यसमूह' तन्त्रस्य माध्यमेन अत्यन्तं निकटतया कार्यं कुरुतः।

## सुभाषितम्

**यद्भूतहितमत्यन्तं, तत्सत्यमिति धारणा विपर्ययकृतोऽधर्मो, यस्मादेवं समाचरेत्॥ (नारदपुराण- ०१/३३/६३)**

अर्थात्- जिससे समस्त प्राणियों का अत्यंत हित (कल्याण) होता हो, शास्त्रों में उसी को 'सत्य' की धारणा माना गया है। इसके विपरीत आचरण करना अधर्म है।




सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## केरल-राज्यस्य वायनाड-जनपदे प्राणहारकपङ्कपातेन त्रयः जनाः मृत्युमुपगाः



केरल-राज्यस्य वायनाड-जनपदे मेप्पाडी-समीपस्थे 'कल्लाडी' स्थानके वायनाड-सुरङ्ग-मार्ग-परियोजनायाः निर्माणस्थले सञ्जातेन एकेन भीषणेन प्राणहारकपङ्कपातेन त्रयः जनाः मृत्युमुपगाः ।वार्ताहरैः सह भाषमाणः मुख्यमन्त्री वी. डी. सतीशनः इमां घटनाम् अत्यन्तं कष्टप्रदां दूर्भाग्यास्पदां च अवर्णयत्। तेन आरोपः कृतः यत् "जनपद-आपद्-प्रबन्धन प्राधिकरणस्य समाह्वानानां पश्चाद् अपि अधिकारिभिः दत्तानां निरन्तर निर्देशानां पालने गम्भीरा उपेक्षा विहिता। तेन अग्रे ज्ञापितं यत् दुर्घटना-स्थले साहाय्य-उद्धार कार्यार्थं राष्ट्रिय आपद्-उद्धार-बलस्य दलानि, राज्य-आरक्षक बलं सहैव अग्निशमन-उद्धार-सेवा-विभागः सद्यः नियोजिताः सन्ति।

## गृहमन्त्री अमितशाहः 'एक पेड मां के नाम' इत्यभियानमभिलक्ष्य दिल्ल्यां सप्तति-लक्ष पादपानां वपनस्य कस्यचित् महाभियानस्य विधिवत् शुभारम्भं विहितवान्



हिमसंस्कृतवार्ता नवदेहली। केन्द्रीय गृहमन्त्री अमितशाहः राष्ट्रियराजधान्याः हरित क्षेत्रस्य संवर्धनाय 'एक पेड मां के नाम' इत्यभियानमभिलक्ष्य दिल्ल्यां सप्तति-लक्ष पादपानां वपनस्य कस्यचित् महाभियानस्य विधिवत् शुभारम्भं विहितवान्।अस्मिन् मङ्गलावसरे सम्बोधयन् श्रीशाहः प्रतिपादितवान् यत् अयं वपन सङ्कल्पः दिल्लीपर्यावरणस्य पर्यावरण-तन्त्रस्य च आमूलं-परिवर्तनाय कश्चन अत्यन्तं महत्त्वपूर्णः अभिनव प्रयासो वर्तते। गृहमान्त्रिणा सविशेषं सबलं च प्रोदीरितं यत् प्रशासनं पावन-यमुनानद्याः प्रदुषण-मुक्तये, स्वच्छतायै च अविरतं दृढतापूर्वकं कार्यं करोति ।

## राष्ट्रपतिपदासीना द्रौपदी मुर्मु डुरण्ड्-कप्-टूर्नामेण्ट् इत्यस्य जयचिह्नानाम् अनावरणम् अकरोत्



राष्ट्रपतिपदासीना द्रौपदी मुर्मु नवदिल्ल्याम् अस्य वर्षस्य डुरण्ड्-कप्-टूर्नामेण्ट् इत्यस्य जयचिह्नानाम् अनावरणम् अकरोत् सहैव ध्वजं प्रदर्श्य तान् प्रेषितवती । सभां सम्बोधयन्ती असौ अवदत् यत् अस्मिन् वर्षे नूतनानि दलानि डुरण्ड्-कप्, प्रेसिडेण्ट्स्-कप्, शिम्ला ट्रोफी इत्येतेभ्यः जयचिह्नेभ्यः प्रतिस्पर्धा करिष्यन्ति।

## केन्द्रीय-जनजातीय-कार्यमन्त्रालयेन जूएल् ओरम् इत्यनेन जनजातीय-विकासाय नवान्वेषणस्य नूतनदृष्टिः उद्घाटिता



केन्द्रीय-जनजातीय-कार्यमन्त्रालयेन जूएल् ओरम् इत्यनेन जनजातीय-विकासाय ज्ञानस्य, नवान्वेषणस्य, साक्ष्याधारित-नीति-निर्माणस्य च यन्त्ररूपेण जनजातीय अनुसन्धान संस्थानां सुदृढीकरणाय नूतनदृष्टिः उद्घाटिता अस्ति। भुवनेश्वरे राष्ट्रियकार्यशालायाः उद्घाटनं कुर्वन् मन्त्री जनजातीय-रिक्थस्य संरक्षणाय, सर्वसमावेशिविकासाय, अत्याधुनिकप्रौद्योगिकीभिः सह स्वदेशिज्ञानस्य एकीकरणाय च आह्वानम् अकरोत्।

# निरमण्ड-गड़सा-उपत्यकायां मेघविस्फोटः, समेजक्षेत्रे आगते प्रबाहे (बाढ़) अस्थायी-सेतुः प्रक्षालितः



हिमसंस्कृतवार्ताः- शिमला । ऋतुविज्ञानविभागस्य नारङ्ग-सतर्कता ('ऑरेंज अलर्ट') इत्यस्य मध्ये मङ्गलवासरे हिमाचलप्रदेशे ऋतोः बहवः वर्णाः दृष्टाः। कुल्लूमण्डलस्य निरमण्डखण्डस्य 'नगेड़' ग्रामस्य उपरि जोतक्षेत्रस्य पर्वतेषु मङ्गलवासरे अपराह्ने प्रचण्डवृष्टेः मध्ये अकस्मात् मेघविस्फोटः संजातः। मेघविस्फोटाद् आगते जलोप्लवे नगेड़-नाले जलस्य प्रवाहः प्रवृद्धः। नगेड़नाला 'छलीर' क्षेत्रस्य समीपे कुर्पणनाले मिलति, येन कारणेन कुर्पण-नाला अपि उद्वेगे आगतः। तथापि, अस्मिन् जनधनस्य किमपि हानिः न संजाता। अपरपक्षे, पूर्वमेव विपदः प्रहारं सहमाने शिमला-मण्डलस्य 'समेज' क्षेत्रे मङ्गलवासरे 'मोहाली' उपनदे प्रचण्डवृष्ट्या प्रबाहः (बाढ़) आगतः। अनेन उपनदे निर्मितः अस्थायीसेतुः (अस्थायी पुल) प्रवाहितः जातः। सेतोः प्रवाहितत्वात् जनानां गमनागमनं रुद्धम्। मोहाली-उपनदस्य प्रबाहेण समेज-उपनदे अपि जलस्तरः प्रवृद्धः। जलस्तरस्य वर्धनेन तटीकरणस्य (तटबन्धनस्य) कार्यम् अपि प्रभावितम् अभवत्। एतेषाम् उपनदानाम् उद्वेगे आगमनेन जनेषु पुनः भयम् उत्पन्नम्। जनैः वर्ष २०२४ तमवर्षस्य प्रबाहः स्मृतः। समेज-सरपारामार्गे अपि भूस्खलनं संजातम्, येन बृहद्वाहनानां गमनागमनं स्तब्धम् अस्ति।

## शिलागढ़-क्षेत्रे मेघविस्फोटः

कुल्लूमण्डलस्य गड़सा-उपत्यकायाः शिलागढ़क्षेत्रे मेघविस्फोटः संजातः। अस्मात् कारणात् पञ्च-उपनदे, पुलिया-उपनदे च प्रबाहः आगता। सम्पूर्णायां गड़सा-उपत्यकायां भयस्य वातावरणम् आसीत्। यद्यपि सम्पूर्णायाम् उपत्यकायां मङ्गलवासरे प्रातःकालात् एव वातावरणं स्वच्छम् आसीत्, परन्तु गड़सा-क्षेत्रस्य उपरितनभागे तीर्थन- उपत्यकायां च अपराह्णात् परं तीव्रा वृष्टिः अभवत्। अस्मिन् 'रहोगी' ग्रामं संयोजयन् एकः सेतुः अपि क्षतिग्रस्तः जातः। अनेन प्रायः १० गृहाणां सम्पर्कः छिन्नः अभवत्। भुन्तरस्य तहसीलदारः नितेशठाकुरः अवदत् यत् गड़सा-उपनदे प्रबाहः आगतः अस्ति सूचना च प्राप्ता यत् मेघविस्फोटाद् उपनदस्य जलस्तरः प्रवृद्धः। प्रशासनं क्षतेः मूल्याङ्कनं कर्तुं संलग्नम् अस्ति।

## भद्राश-ब्रान्दली-मार्गे मलिनावशेषः, ग्रामीणानां वर्धिताः समस्याः

सरपारा-पञ्चायतस्य प्रधानः इन्द्रखुराना ज्ञापितवान् यत् समेज-क्षेत्रे मिलितवत्यां मोहाली-उपनदे प्रबाहस्य आगमनेन एकः अस्थायी-सेतुः प्रवाहितः। मङ्गलवासरे अपराह्णात् परं रामपुर-निरमण्ड- समीपवर्तिषु क्षेत्रेषु च प्लचण्डवृष्टिः अभवत्। प्रचण्डवृष्टेः परं १५/२० क्षेत्रस्य गानवी-नाला, रामपुरस्य नोगली-नाला सतलुज-नदी च उद्वेगे अस्ति। सिरमौरमण्डले बहुषु स्थानेषु मङ्गलवासरे मन्दतः मध्यमा वृष्टिः संजाता। 'नेहली धीड़ा' क्षेत्रस्य समीपे शैलखण्डस्य (चट्टान) पतनेन नाहन-रेणुकाजी-मार्गः प्रायः एकघण्टां यावत् अवरुद्धः आसीत्। मार्गस्य उभयतः वाहनानां दीर्घाः पङ्क्यः सञ्जाताः। अनन्तरं प्रशासनेन मलिनावशेषम् अपसार्थ्य यातायातं पुनरुद्धतम्। उपमण्डलं रामपुरं रोहड़ू-नगरेण संयोजयकः भद्राश- ब्रान्दली-मार्गे अधुना ग्रामीणानां कष्टानि वर्धितुम् आरब्धानि सन्ति। वर्षाकाले नरैण-पञ्चायतस्य भूस्खलनप्रभावितात् क्षेत्रात् आरभ्य कुरनू-ग्रामं यावत् स्थितिः अतीव गम्भीरा भवति। मलिनावशेषः मार्गं यावत् प्राप्नोति यात्रा च सङ्कटपूर्णा भवति। क्षेत्रस्य ग्रामीणैः सुरक्षादृष्ट्या अत्र उचितप्रबन्धनस्य याचना कृता अस्ति।

## बहुषु भागेषु १३ जुलाई पर्यन्तं प्रवर्तिष्यते वृष्टिः-

ऋतुविज्ञानकेन्द्र-शिमलायाः अनुसारं राज्ये ७, ८, ११, १२ तथा १३ जुलाई दिनाङ्केषु अधिकांशस्थानेषु मन्दतः मध्यमा वृष्टिः भवितुं सम्भावना अस्ति। ७ जुलाई दिनाङ्के केषुचित् स्थानेषु बहुतः अतिबहुवृष्टिः, ८, ११, १२ एवं १३ जुलाई दिनाङ्केषु केषुचित् स्थानेषु प्रचण्डवृष्टेः पूर्वानुमानं वर्तते। सप्ताहस्य अवशिष्टेषु दिनेषु राज्यस्य बहुषु स्थानेषु मन्दतः मध्यमा वृष्टिः केषुचित् स्थानेषु च प्रचण्डवृष्टिः भवितुं शक्नोति। बहुभ्यः मण्डलेभ्यः पीत-सतर्कता ('येलो अलर्ट') प्रसारिता। हमीरपुर- काङ्गड़ा-मण्डी-शिमला-सिरमौरमण्डलेषु बुधवासरे केषुचित् स्थानेषु वृष्टेः सम्भावना वर्तते।

## रोहताङ्ग-गिरिद्वारे उच्चक्षेत्रेषु च वृष्ट्या सह पतिताः हिम-कणाः

काङ्गड़ा-मण्डले प्रातःकाले ऋतोः स्वच्छत्वात् परम् अपराह्ने धर्मशाला-समीपवर्तिषु क्षेत्रेषु च वृष्टिः अभवत्। रोहताङ्ग-गिरिद्वारे उच्चशिखरेषु च वृष्ट्या सह हिम-कणाः पतिताः। बञ्जारस्य तीर्थन- उपत्यकायां तीव्रेण वायुना सह वृष्टिः संजाता। हमीरपुर-ऊना मण्डलयोः आदिनं सूर्य-मेघानां मिचामी-क्रीडा (आंखमिचौनी) प्रवृत्ता। सूर्यप्रकाशस्य आगमनेन वातावरणे उमसः (आर्द्रांशजन्योष्मा) प्रवृद्धः अस्ति।

# केन्द्रीयकृषिमन्त्री शिवराजसिंह चौहानः विंशति सहस्राधिक कृषि उद्यमिनः विंशति लक्ष कृषकान् सशक्तीकर्तुं प्रगति-परियोजनायाः शुभारम्भम् अकरोत्



केन्द्रीयकृषिमन्त्री शिवराजसिंह चौहानः विंशति सहस्राधिक कृषि उद्यमिनः विंशति लक्ष कृषकान् सशक्तीकर्तुं प्रगति-परियोजनायाः शुभारम्भम् अकरोत्। नवदिल्ल्यां वार्ताहरैः सह वार्तालापं कुर्वन्, श्रीचौहानः विकसितभारतस्य सङ्कल्पं साधयितुं तथा कृषिक्षेत्रस्य, समृद्धग्रामाणां, समृद्धकृषकानां च विकासस्य आवश्यकतायै बलं प्रदत्तवान्। कृषि मन्त्री अवदत् यत् प्रगति-कार्यक्रमस्य अन्तर्गतं षड्विंशति-सहस्र-लघु-कृषि-उद्यमिनः प्रशिक्षयितुं प्रशासनेन निर्णयः कृतः अस्ति इति। सः अवदत् यत् एते उद्यमिनः ग्रामे एव कार्यं कुर्वन्ति, ग्रामकृषि परिवर्तयितुं शत-द्विशत-कृषकैः सह सहयोगं कुर्वन्ति इति।

# निर्वाचनायोगेन बिहार-गुजरात-मध्यप्रदेश राज्यानां त्रिविधान-सभासनानाम् उपनिर्वाचनेभ्यः अधिसूचना प्रख्यापिता




हिमसंस्कृतवार्ता। निर्वाचनायोगेन बिहार-गुजरात-मध्यप्रदेश राज्यानां त्रिविधान-सभासनानाम् उपनिर्वाचनेभ्यः अधिसूचना प्रख्यापिता। बिहारे बाङ्कीपुरस्य गुजराते मञ्जलपुरस्य मध्यप्रदेशे दतिया इत्येतस्य विधानसभासनेषु उपनिर्वाचनं भविष्यति। नामाङ्कनपत्रं जुलाईमासस्य त्रयोदशदिनाङ्कं यावत् प्रपूरयिष्यते तथा चतुर्दशदिनाङ्के नामाङ्कनप्रपत्राणां निरीक्षणं भविष्यति। मतदानम् अस्मिन् जुलाईमासे त्रिंशत्-दिनाङ्के भविष्यति।अधिसूचना अद्य प्रख्यापयिष्यते, तत्रैव नामाङ्कनपत्रं प्रपूरणार्थम् अन्तिमतिथिः अस्य जुलाईमासस्य चतुर्दशदिनाङ्कं यावत् वर्तते। नामाङ्कनपत्राणां निरीक्षणं पञ्चदशदिनाङ्के भविष्यति। मतदानम् अस्मिन् जुलाईमासे चतुर्विंशतिदिनाङ्के तथा मतगणना अपि तस्मिन्नेव दिवसे भविष्यति।

# आगामिषु त्रिषु दिनेषु देशस्य विभिन्नेषु प्रान्तेषु विशेषतः गुजरात, हरियाणा, पञ्जाब अथ राजस्थानक्षेत्रेषु प्रावृट् स्थितिः सर्वथा अनुकूला वर्तते



भारतर्तु-विज्ञान-विभागेन उक्तं यत् आगामिषु त्रिषु दिनेषु नैऋत्य-प्रावृषे उत्तर-अरबसागर, गुजरात इत्येतयोः अन्येषु केषुचित् भागेषु तत्रैव हरियाणा, पञ्जाब राजस्थान इत्येतेषां शेषभागेषु अग्रे गन्तुं स्थितिः अनुकूला अस्ति। तटीय-कर्नाटकस्य, गुजरातस्य, कोकणस्य, गोवाराज्यस्य, मध्यमहाराष्ट्रस्य च केषुचित् भागेषु प्रचण्डवृष्टिः भविष्यति इति ऋतु-विभागेन पूर्वानुमानितम्।

# नौणी-विश्वविद्यालये प्रो. प्रेमलालगौतमः 'साइटेशन ऑफ ऑनर' इति सम्मान-पत्रेण सम्मानितः




**हिमसंस्कृतवार्ताः- सोलनम्।** डॉ. यशवन्तसिंहपरमार- औद्यानिकी एवं वानिकी-विश्वविद्यालयेन (नौणी) स्वकीयः विशिष्टः पूर्वतनछात्रः पूर्वतन-सङ्कायः (फैकल्टी) च प्रख्यातः कृषिवैज्ञानिकः पद्मश्री प्रो. प्रेमलालगौतमः भारतीयकृषेः, कृष्यनुसन्धानस्य, शिक्षायाः, कृषिनीतिनिर्माणस्य च क्षेत्रेषु तस्य असाधारणाय सम्प्रदानाय विश्वविद्यालयस्य 'साइटेशन ऑफ ऑनर' इति सम्माननेन विभूषितः। मङ्गलवासरे आयोजिते कार्यक्रमे प्रो. गौतम महोदयस्य तथा च कम लागौतममहोदयायाः पारम्परिकं हिमाचली- स्वागतं विहितम्। एतस्मात् परं कृषिशिक्षा- अनुसन्धानयोः क्षेत्रे तयोः अतुलनीयाय योगदानाय विश्वविद्यालयस्य कुलपतिना प्रो. एच.एस. बवेजामहोदयेन एषः सम्मानः विश्वविद्यालयस्य सेवानिवृत्तानां प्राध्यापकानां, वैज्ञानिकानां, कर्मचारिणां विद्यार्थिनां च उपस्थितौ आयोजितस्य विशेषसमारोहस्य अन्तराले प्रदत्तः।प्रो. गौतमः सोलनस्थित-कृषिमहाविद्यालयस्य पूर्वतनछात्रः वर्तते। तेन विश्वविद्यालये वानिकामहाविद्यालयस्य अधिष्ठातृरूपेण (डीन) अपि स्वसेवाः प्रदत्ताः। पञ्चदशकेभ्यः (५० वर्षेभ्यः) अधिकदीर्घे स्वकीये गौरवपूर्णे कार्यकाले तेन भारतीयकृषेः अनेकेषु सर्वोच्चपदेषु कार्यं कृतं, येषु भारतीयकृष्यनुसन्धानपरिषदः उपमहानिदेशकः, राष्ट्रियपादप- आनुवंशिक- संसाधनब्यूरो इत्यस्य निदेशकः, पादपप्रकार एवं कृषक अधिकारसंरक्षण- प्राधिकरणस्य अध्यक्षः तथा च राष्ट्रियजैवविविधताप्राधिकरणस्य अध्यक्षः सदृशानि महत्त्वपूर्णानि पदानि सम्मिलितानि सन्ति। सम्प्रति सः डॉ. राजेन्द्रप्रसाद- केन्द्रीयकृषिविश्वविद्यालयस्य पूसा (बिहार) इत्यस्य कुलाधिपतिः (चांसलर) वर्तते। सद्यः एव सः विज्ञान-अभियान्त्रिकीक्षेत्रे तस्य विशिष्टाय योगदानाय देशस्य सर्वोच्चनागरिकसम्मानेषु अन्यतमेन 'पदमश्री' उपाधिना अलङ्कृतः। एतदतिरिच्य, हिमाचलप्रदेशसर्वकारेण अपि सः 'हिमाचलगौरवपुरस्कारेण' सम्मानितः अस्ति।

अस्मिन् अवसरे कुलपतिना प्रो. एच.एस. बवेजामहोदयेन कथितं यत् एषः समारोहः विश्वविद्यालयस्य इतिहासस्य एकः गौरवपूर्णः अध्यायः अस्ति। तेन प्रोक्तं यत् प्रो. गौतमस्य सम्मानः केवलं कस्यचित् प्रख्यातवैज्ञानिकस्य सम्मानः नास्ति, अपि तु विश्वविद्यालयस्य एतादृशस्य प्रेरणास्रोतसः पूर्वतनछात्रस्य पूर्वतनसङ्कायस्य च गौरवम् अस्ति, यस्य उपलब्धयः निरन्तरं विश्वविद्यालयस्य प्रतिष्ठां वर्धयन्ति। कुलपतिना प्रतिपादितं यत् विश्वविद्यालयः प्रो. गौतमेन सह स्वकीयान् आत्मीयसम्बन्धान् प्रति गर्वम् अनुभवति तथा च उत्कृष्टतायाः, नवाचारस्य, समाजसेवाबायाश्च तान् आदर्शान् अग्रे नेतुं कटिबद्धः अस्ति।

## कृषिक्षेत्रस्य साफल्यं कृषकाणां वैज्ञानिकानां च श्रमे निहितम्- प्रो. गौतमः

प्रो. प्रेमलालगौतमेन अस्य सम्मानस्य कृते विश्वविद्यालयं प्रति कृतज्ञतां प्रकटयता कथितं यत् यस्मिन् संस्थाने तेन अध्ययनम् अध्यापनं च कृतं, तत्र पुनः आगमनं तस्य कृते अतीव भावुकम् अविस्मरणीयञ्च अनुभवः अस्ति। विश्वविद्यालयस्य श्लाघनीयायाः प्रगतेः प्रशंसां कुर्वता तेन शिक्षकाः, कर्मचारिणः, विद्यार्थिनः पूर्वतनछात्राश्च संस्थानस्य निरन्तरोन्नत्यै राष्ट्रियस्तरे प्रतिष्ठावर्धनाय च सामूहिकरूपेण कार्यं कर्तुम् आहूताः। प्रो. गौतमेन देशस्य कृषकाः कृषिवैज्ञानिकाश्च भारतीयकृषेः साफल्यस्य वास्तविकः आधारः इति प्रतिपादयता कथितं यत् अद्य कृषिक्षेत्रे याः उपलब्धयः प्राप्ताः सन्ति, ताः कृषकाणां श्रमस्य, वैज्ञानिकानां नवाचारस्य उभयोः समर्पितप्रयासाणां च परिणामः वर्तते। विद्यार्थिनः सम्बोधयन् तेन उक्तं यत् साफल्यस्य कोऽपि लघुपथः (शॉर्टकट) न भवति, निरन्तरपरिश्रमः, अनुशासनं दृढसङ्कल्पः एव जीवने साफल्यस्य मार्गं प्रशस्तं कुर्वन्ति।

कृष्यनुसन्धानस्य परिवर्तमानानाम् आवश्यकतानाम् उल्लेखं कुर्वता तेन सशक्तसमन्वितशोधदलानां (रिसर्च टीम) निर्माणस्य आवश्यकतायाम् बलं दत्तम्। तेन प्रतिपादितं यत् भविष्यस्य आह्वानानां, विशेषतः जलवायुपरिवर्तनस्य, खाद्यसुरक्षायाः, उदीयमानप्रौद्योगिकीनां (इमर्जिंग टेक्नोलॉजी) च प्रभावी-सम्मुखीकरणाय पूर्वानुमान-आधारित- अनुसन्धानस्य प्रोत्साहनं समयस्य आवश्यकता अस्ति। तेन कथितं यत् कृषिक्षेत्रस्य भविष्यं सार्वजनिक- निजी- सहभागितायां निहितं वर्तते, यदर्थं प्रेरितस्य, दक्षस्य, गुणवत्तापूर्णस्य च मानवसंसाधनस्य विकासः अतीव आवश्यकः अस्ति।

प्रो. गौतमेन विद्यार्थिनः युवानः व्यावसायिकाश्च योगं, ध्यानं, स्वस्थजीवनशैलीं च स्वीकर्तुम् उपदिष्टाः, उक्तञ्च यत् उत्कृष्टव्यावसायिक- उपलब्धिभिः साकं स्वस्थं शरीरं, सन्तुलितं मनः, अनुशासितं जीवनम् अपि तावदेव आवश्यकं वर्तते। तेन सर्वैः स्वशिक्षणसंस्थानेन व्यावसायिक- समुदायेन च निरन्तरं सम्बद्धैः स्थातुम् आग्रहं कुर्वता कथितं यत् सुदृढाः सम्बन्धाः सामूहिकाः प्रचेष्टाः एव संस्थागतविकासस्य राष्ट्रनिर्माणस्य च आधारशिला सन्ति। अस्मिन् अवसरे 'इंडियन फार्मर एलायंस' (IFA) तथा च विश्वविद्यालयस्य सेवानिवृत्तशिक्षकसङ्घेन अपि प्रो. गौतमः कृषिविज्ञानस्य क्षेत्रे तस्य उत्कृष्टाय योगदानाय विशेषरूपेण सम्मानितः। कार्यक्रमस्य समापनं छात्रकल्याण-अधिष्ठात्रा डॉ. एस.के. भारद्वाजेन उपस्थापित-धन्यवादप्रस्तावेन सह अभवत्।

# मन्त्रिमण्डलविस्तारात् पूर्वं नवदेहल्यां खड़गेमहोदयेन अमिलत् उपमुख्यमन्त्री मुकेशअग्निहोत्री, प्रदेशहितस्य विषयेषु विहितवान् चर्चाम्



**हिमसंस्कृतवार्ताः — शिमला ।** उपमुख्यमन्त्री मुकेशअग्निहोत्री मङ्गलवासरे नवदेहल्यां काङ्ग्रेसदलस्य राष्ट्रियाध्यक्षेण मल्लिकार्जुनखर्गेमहोदयेन सह शिष्टाचारमेलनं (सौजन्यपूर्णं मेलनम्) कृतवान्। अस्मिन् अन्तराले द्वयोः नेतृद्वयोः मध्ये हिमाचलप्रदेशस्य वर्तमान-राजनैतिक-विकासात्मक-परिदृश्यानां साकमेव सङ्घटनात्मकविषयेषु विस्तरेण चर्चा संजाता। उपवेशनकाले प्रदेशे प्रचलन्तीनां विकास-जनकल्याणकारी-योजनानां सहैव सर्वकारस्य प्राथमिकतासु अपि विचारविमर्शः विहितः। एतदतिरिच्य राष्ट्रियाध्यक्षेण प्रदेशसर्वकार-सङ्घटनाभ्यां सम्बद्धेषु विभिन्नविषयेषु उपमुख्यमन्त्रिणः सूचना अपि प्राप्ता।

## मन्त्रिमण्डले रिक्तपदं पूरयितुं चर्चा तीव्रा

हिमाचलप्रदेशमन्त्रिमण्डले एकं पदं सुदीर्घकालात् रिक्तं वर्तते। अस्य पूरणाय प्रतीक्षा क्रियते। गतेषु दिनेषु शिमलायां सम्पन्नायां प्रदेशकाङ्ग्रेसस्य सामान्यसभायां प्रदेशविषयाणां प्रभारिण्या रजनीपाटिलमहोदयया अपि मन्त्रिमण्डले परिवर्तनाय वार्ता कथिता आसीत्। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खू महोदयेन अपि प्रोक्तम् आसीत् यत् मन्त्रिमण्डलस्य रिक्तपदं पूरणीयं वर्तते।

अस्य पदस्य पूरणाय निर्णयः दलीय-उच्चाधिकारिभिः (हाईकमान) एव करणीयः अस्ति। एतस्मात् परमेव राजनैतिकवीथिषु एषा चर्चा प्रचलति यत् काङ्ग्रेसनेतृत्त्वं शीघ्रमेव अस्मिन् सन्दर्भे निर्णयं ग्रहीतुं शक्नोति। धर्मशालायां काङ्ग्रेसस्य राजनैतिकविषयसमित्याः उपवेशनम् अपि प्रस्तावितं वर्तते। अस्मिन् उपवेशने सर्वकार-सङ्घटनाभ्यां सम्बद्धेषु बहुषु विषयेषु विमर्शस्य सम्भावना अस्ति। राजनैतिकविशेषज्ञानां मान्यता अस्ति यत् यदि दलीय उच्चाधिकारिभ्यः हरितसङ्केतः (हरी झंडी) प्राप्यते, तर्हि अस्य उपवेशनस्य परं कदापि मन्त्रिमण्डलविस्तारस्य घोषणा भवितुं शक्नोति।

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। अद्य मया विचित्रं वृत्तं पठितम् अस्ति। ऑस्ट्रेलियादेशस्य समुद्रतटे केचन विचित्राः अन्तरिक्षगोलकाः प्राप्ताः। प्राधिकारिभिः जनप्रबोधनं कृतम् अस्ति।

**काव्या-** नमस्ते नन्दिनि। तद् वृत्तं तु अतीव विस्मयकारकम् अस्ति। महाकाशशङ्का भीतिं जनयति। इतोऽपि एकं घोरं वृत्तं मया अत्र लिखितम् अस्ति। अरिजोना-राज्ये कश्चन मृतः इति घोषितः शिशुः शवशालायां जीवितः प्राप्तः।

**नन्दिनी-** अहो! तस्य शिशोः जीवनं तु दैवकृपा एव। शवशालायाः वृत्तं श्रुत्वा मम रोमाञ्चः जातः। अधुना यानविषये कथयामि। सान फ्रान्सिस्कोनगरे चालक-रहितवाहनैः मार्गावरोधः कृतः। कानिचित् वाहनानि अग्नि-क्रीडया दग्धानि अपि।

**काव्या-** सत्यम्, एतानि यन्त्राणि कदाचित् आपदं यच्छन्ति। अग्नि-क्रीडादहनं तु भयानकम्। एतादृशम् एव अपरं वृत्तं शिकागो-नगरे प्रवृत्तम्। तत्र गगने गच्छत् एकं विमानं जनैः क्षिप्तया अग्नि-क्रीडया ताडितम्। विमानं सुरक्षितं भूमौ अवतीर्णम्।

**नन्दिनी-** हन्त! गगनेऽपि अग्नि-क्रीडाभयम्! विमानावतरणं तु सुदैवेन सुकरं जातम्। अद्यतन्यः सर्वाः वार्ताः समाप्ताः। नमो नमः।

हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

# कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालये सुलभछात्रवृत्त्या प्रफुल्लितानि विद्यार्थिनां मुखमण्डलानि, पञ्च पूर्वच्छात्राः सम्मानिताः



**हिमसंस्कृतवार्ता, विश्व मोहन झा, दरभंगा।**

दरभङ्गा। दीर्घप्रतीक्षायाः अनन्तरं सुलभछात्रवृत्तेः प्राप्त्या व्याकरणविभागस्य पञ्चानां पूर्वच्छात्राणां मुखमण्डलानि हर्षेण प्रफुल्लितानि अभवन्। कामेश्वरसिंहदरभङ्गासंस्कृत-विश्वविद्यालयस्य २०१९-२०२१ शैक्षणिकसत्रस्य आचार्यतृतीय-चतुर्थसत्रयोः पूर्वच्छात्रेभ्यः—देवेशकुमारझाय, गजेन्द्रकुमारझाय, दीपककुमाराय, शालिन्यै तथा जवाहरपण्डिताय—प्रत्येकं ₹७,५०० परिमिता सुलभछात्रवृत्तिः प्रदत्ता। छात्रवृत्तिं प्राप्य ते एतां स्वपरिश्रमस्य सम्मानरूपाम् इति मत्वा परमं सन्तोषम् अभिव्यक्तवन्तः।अस्मिन्नवसरे विभागाध्यक्षः डॉ. सीताचरणझा, साहित्यसंकायाध्यक्षः प्रो. दयानाथझा, डॉ. साधनाशर्मा, डॉ. एल्. सवितार्या, डॉ. यदुवीरस्वरूपशास्त्री तथा डॉ. रामसेवकझा विद्यार्थिभ्यः शुभाशंसाः प्रदाय उक्तवन्तः यत् नियमितोपस्थितिः, अनुशासितमध्ययनम्, सततपरिश्रमश्च सफलतायाः मूलाधाराः सन्ति।विश्वविद्यालयस्य जनसम्पर्कपदाधिकारी डॉ. निशिकान्तसिंहः अवदत् यत् स्वर्गीयेन डॉ. बिन्देश्वरपाठकेन विश्वविद्यालयाय दानरूपेण प्रदत्तया निध्या एषा छात्रवृत्तिः प्रदीयते। अस्याः छात्रवृत्तेः प्रमुखोद्देशः मेधाविनः, नियमिताध्ययनशीलान् तथा आर्थिकदृष्ट्या वञ्चितान् विद्यार्थिनः प्रोत्साहयितुम् अस्ति।

# हजारिबागनगरे संस्कृतपठनस्थगनविरोधे महती गोष्ठी आयोजिता



**हिमसंस्कृतवार्ता, प्रज्ञा द्विवेदी, झारखण्डः।**

षड्विंशत्यधिकद्विसहस्रतमे कृष्टाब्दे सप्तममासस्य पञ्चमदिनाङ्के भानुवासरे हजारिबागनगरस्य ध्वजचतुष्पथसमीपस्थे भाग्यमणिविवाहमण्डपे सन्तकोलम्बामहाविद्यालये के॰बी॰महिलामहाविद्यालये च राज्यशासनेन संस्कृतपठनस्थगनस्य विरोधाय संस्कृतानुरागिणः एकां गोष्ठीम् आयोजयन् यस्याः गोष्ठ्याः अध्यक्षतां विनोबाभावेविश्वविद्यालयस्य मानविकीसङ्कायस्य पूर्वसङ्कायाध्यक्षः डॉ॰ताराकान्तशुक्लोऽकरोत्। अस्यां गोष्ठ्यां विनोबाभावेविश्वविद्यालयस्य स्नातकोत्तरसंस्कृतविभागस्य पूर्वविभागाध्यक्षः डॉ नकुलपाण्डेयः वर्तमानविभागाध्यक्षा डॉ॰ अञ्जुम आरा सन्तकोलम्बामहाविद्यालयस्य विभागाध्यक्षः डॉ सुबोधकुमारसाहूः संस्कृतानुरागी गुप्तोमप्रकाशः इत्यादयः गणमान्याः जनाः समगच्छन्। एतस्यां सभायां शताधिकाः छात्रछात्राः भागम् अगृह्णन्। सर्वे संस्कृतानुरागिणः शासनस्य एतत् पदक्षेपम् अनुचितम् अतार्किकं संस्कृतविरोधि अन्यायपूर्णं भेदभावपूर्णञ्च अघोषयन्। यः विषयः भारतीयज्ञानपरम्परायाः मुख्याधारः विद्यते तस्य एव पठनं महाविद्यालयेषु पिधातुं राज्यशासनस्य निर्णयम् अतीव चिन्ताजनकं निन्दनीयञ्च ते अवदन्। उपर्युक्तमहाविद्यालयद्वये संस्कृतपठनं कथं पुनः प्रारभ्येत तथा च संस्कृतविभागः कथं रक्ष्येत इति विषये उपस्थिताः जनाः गहनविचारविमर्शम् अकुर्वन् आगामिरणनीतिञ्च अनिश्चयन्॥

# अयोध्या-राममन्दिरविवादः — मुख्यमन्त्री सुक्खुः शिमलानगरस्थितं राममन्दिरम् अगच्छत्, अवदत्— "आस्थायाः उपरि प्रहारः कदापि न सह्यते।"



**हिमसंस्कृतवार्ताः शिमला** ।अयोध्यास्थितराममन्दिरस्य समर्पणेन (चढावे) सह सम्बद्धेन कथितविवादेन हिमाचलप्रदेशस्य राजनीतौ एकं नवीनं परिवर्तनं जातम्। अस्मिन् विवादे मुख्यमन्त्री सुखविन्दरसिंहसुक्खू स्वमन्त्रिमण्डलेन कांग्रेसविधायकैः च सह पादचारं कुर्वन् शिमलायाः ऐतिहासिकं राममन्दिरं प्राप्तवान्। तत्र सः भगवान् श्रीरामस्य विधिवत् पूजा-अर्चनायां हवने च भागं गृहीतवान्। अस्मिन् अन्तरे कांग्रेसकार्यकर्तारः भाजपापक्षस्य विरुद्धं घोषणाम् (नारेबाजी) अपि कृतवन्तः।आस्थायां भक्तौ च बलं मन्दिरं प्राप्य मुख्यमन्त्रिणा, मन्त्रिभिः, विधायकैः च भजन-कीर्तनेषु भागः गृहीतः, श्रीरामप्रतिमायाः अभिषेकः कृतः, मन्दिरस्य परिक्रमा कृता, हवने च आहुतिं दत्त्वा प्रदेशस्य सुख-समृद्ध्ये कामना कृता। पूजा-अर्चनायाः अनन्तरं मुख्यमन्त्री सुक्खू उक्तवान् यत् यदि समर्पणराशौ (चढ़ावे) अनियमिततायाः आरोपाः सत्याः सन्ति, तर्हि एषः केवलं धनस्य विषयः न, अपितु कोटिशः श्रद्धालूनां आस्थायाः विषयः अस्ति। सः एतस्मिन् बलं दत्तवान् यत् यदा राममन्दिरनिर्माणाय देशव्यापिनी सहयोगराशिः एकत्र क्रियते स्म, तदा सः विधायकपदे तिष्ठन् स्वश्रद्धानुसारं योगदानं दत्तवान् आसीत्। सः एतदपि स्मारितवान् यत् रामललायाः प्राणप्रतिष्ठावसरे हिमाचलसर्वकारेण सम्पूर्णदिवसस्य सार्वजनिकः अवकाशः घोषितः आसीत्।

## भाजपापक्षे कटाक्षः

मुख्यमन्त्री भाजपापक्षं लक्ष्यीकृत्य उक्तवान् यत् भगवान् श्रीरामः कोटिशः जनानां आस्थायाः केन्द्रम् अस्ति, तस्य आदर्शेषु चलनमपि सच्ची भक्तिः अस्ति। सः एतदपि अवदत् यत् वास्तविकाः श्रद्धालवः भगवतः नाम्नि राजनीतिं न कुर्वन्ति। मुख्यमन्त्री भगवान् श्रीरामं प्रार्थितवान् यत् आस्थां क्लेशयितृभ्यः (ठेस पहुंचाने वालों को) सद्बुद्धिः मिलतु।

राजीवगान्धिनः भूमिकायाः पुष्टिः मुख्यमन्त्री सुखविन्दरसिंहसुक्खू एतदपि पुष्टिं कृतवान् यत् राममन्दिरान्दोलने पूर्वप्रधानमन्त्रिणः राजीवगान्धिनः अपि महती भूमिका आसीत्। अनेन कथनेन सः कांग्रेसपक्षस्य दृष्टिकोणं स्पष्टं कर्तुं प्रयतितवान्, भाजपापक्षे च आस्थायाः राजनीतीकरणस्य आरोपं च कृतवान्।

## राममन्दिरविवादे विक्रमादित्यसिंहस्य तीक्ष्णः सन्देशः, लिखितम्- 'हे रघुनन्दन, वयं लज्जिताः स्मः...'

अयोध्यास्थितराममन्दिरस्य कथितधनसङ्ग्रहविवादं (चंदा विवाद) लेकर देशव्यापीराजनीतिकविमर्शस्य मध्ये हिमाचलप्रदेशस्य लोकनिर्माणमन्त्री विक्रमादित्यसिंहः सामाजिकमाध्यमे (Social Media) एकं सन्देशं (Post) साझीकृत्य स्वप्रतिक्रियां दत्तवान्। तस्य सन्देशस्य प्रकाशनान्तरं प्रदेशस्य राजनीतौ अस्मिन् विषये प्रतिक्रिया ततोऽपि तीव्रा भवितुं सङ्केताः प्राप्यन्ते।विक्रमादित्यसिंहः स्वकीये आधिकारिके सामाजिकमाध्यमखातायां (Social Media Account) "जय श्री राम" इति लिखन् एकं भावनात्मकं सन्देशं लिखितवान्।

सन्देशे सः अलिखत्—

हे रघुनन्दन, वयं लज्जिताः स्मः, भवतः नाम्नि सत्तां भुञ्जानाः अद्यापि जीवन्तः सन्ति। यैः भगवद्वस्त्रस्य (भगवे की) आवरणं कृत्वा भवतः एव धाम लुण्ठितम्, ते 'रामभक्ताः' भवितारः ढोंगिनः अद्यापि कारागारात् बहिः खगाः (परिन्दा) इव भ्रमन्ति।'

मन्त्रिणा स्वसन्देशे कस्यापि व्यक्तेः, सङ्गठनस्य वा राजनीतिकदलस्य नाम न गृहीतम्। तथापि, एतत् राममन्दिरस्य कथितधनसङ्ग्रहविवादे तस्य राजनीतिकप्रतिक्रियारूपेण दृश्यते।एषः सन्देशः तादृशे समये पुरतः आगतः, यदा अस्मिन् विषये विभिन्नराजनीतिकदलानां मध्ये आरोपाप्रत्यारोपाणां क्रमः प्रचलति। हिमाचलप्रदेशे अपि अस्मिन् विषये निरन्तरं राजनीतिकप्रतिक्रियाः आगच्छन्ति। विक्रमादित्यसिंहस्य सन्देशात् परं अस्मिन् विषये राजनैतिकविमर्शः अधिकः तीव्रः भवितुं सम्भावना अस्ति।

कांग्रेसपक्षस्य राममन्दिरनीतौ बिन्दलस्य प्रहारः, उक्तवन्तः– आस्था न, अवसरवादिनी राजनीतिः अयोध्यास्थितराममन्दिरसम्बद्धस्य कथितविवादस्य मध्ये हिमाचलप्रदेशे राजनीतिकबयानबाजी निरन्तरं तीव्रा भवति। अस्यामेव शृङ्खलायाम् भारतीयजनतापक्षस्य प्रदेशाध्यक्षः डॉ. राजीवबिन्दलः कांग्रेसपक्षस्य उपरि तीक्ष्णप्रहारं कुर्वन् राममन्दिरं प्रति पक्षस्य दृष्टिकोणे प्रश्नान् उत्थापितवान्।डॉ. बिन्दलः अवदत् यत् कांग्रेसपक्षस्य वर्तमानराजनीतावेषा लोकोक्तिः पूर्णतया चरितार्था भवति यत् 'शतं मूषिकान् खादित्वा मार्जारी हज्जं प्रति गता' (१०० चूहे खाकर बिल्ली हज को चली)। तस्य आरोपः अस्ति यत् कांग्रेसपक्षः बहुवर्षं यावत् श्रीरामजन्मभूमौ मन्दिरनिर्माणस्य विरोधं कृतवान्, अधुना च राजनीतिकपरिस्थित्यनुसारं स्वदृष्टिकोणं परिवर्तयति।

# बी.पी.एल. परिवाराणां चयनाय समयसीमा प्रवर्धिता, अधुना १३ जुलाईदिनाङ्कं यावत् भविष्यन्ति आवेदनानि सत्यापनानि च।ग्रामीणविकासविभागेन सर्वान् मण्डलोपायुक्तान् प्रति प्रेषिताः संशोधिताः निर्देशाः




**हिमसंस्कृतवार्ताः- शिमला।**प्रदेशसर्वकारेण बी.पी.एल. परिवाराणां चयनार्थं प्रचलतः अष्टमचरणस्य समयसीमा वर्धिता। ग्रामीणविकासविभागेन प्रसारितानां संशोधितानाम् आदेशानाम् अनुकूलाधारेण अधुना आवेदनप्राप्तिः, पात्रतायाः सत्यापनं, ग्रामस्तरे अनुशंसा च इत्येषा सम्पूर्णा प्रक्रिया १३ जुलाई २०२६ (2026) पर्यन्तं प्रचालयिष्यते। एतस्मात् परं सर्वाः औपचारिकताः पूरयित्वा २० जुलाई २०२६ पर्यन्तं बी.पी.एल. परिवाराणां संशोधिता सूचिका प्रकाशयिष्यते। ग्रामीणविकासविभागस्य सचिवेन सी. पालरासु महोदयेन ७ जुलाई दिनाङ्के कृते आदेशे ज्ञापितं यत् विभागस्य २२ जून २०२६ तमे दिनाङ्के प्रसारितानां दिशानिर्देशानां निर्धारितसमयसीमायाः संशोधनं विहितम् अस्ति। पूर्वम् अष्टमचरणस्य अन्तर्गतं आवेदनप्राप्तिः, सत्यापनम् अनुशंसाकार्यञ्च ५ जुलाई यावत् पूर्णं करणीयम् आसीत्, १५ जुलाई यावत् च सूचीप्रकाशनस्य प्रावधानम् आसीत्। अधुना एताम् अवधिं वर्धयित्वा आवेदन- सत्यापनयोः अन्तिमा तिथिः १३ जुलाई, सूचीप्रकाशस्य तिथिः च २० जुलाई निश्चिता कृता। अस्मिन् सन्दर्भे ग्रामीणविकासविभागस्य निदेशकेन राघवशर्मणा प्रदेशस्य सर्वान् मण्डलोपायुक्तान् प्रति पत्रं प्रेषयित्वा संशोधितानुसारं आगामिकार्यविधिं सुनिश्चितं कर्तुं निर्देशाः दत्ताः। साकमेव सर्वान् मण्डल- विकासाधिकारिणः खण्डविकासाधिकारिणश्च प्रति आदेशप्रतिलिपिं प्रेषयन्तः कथितं यत् बी.पी.एल. चयनप्रक्रिया निर्धारितावधौ एव पूर्णा विधातव्या, सर्वेषां पात्रावेदनानां च निष्पक्ष-पारदर्शि-रीत्या सत्यापनं करणीयम्। विभागेन स्पष्टीकृतं यत् अष्टमचरणे प्राप्तानां सर्वेषाम् आवेदनानां पात्रतायाः परीक्षणं सर्वकारनिर्धारित-मानदण्डानुसारं विधास्यते। सत्यापनात् परं सम्बद्धानां ग्रामपञ्चायतानाम् अधिकारिणां च अनुशंसाधारेण अन्तिमा सूची सज्जीकरिष्यते। तदनन्तरं सूचीं निर्धारितप्रक्रियया सार्वजनिकीकरिष्यते, येन पात्रपरिवारेभ्यः सर्वकारस्य विभिन्नानां कल्याणकारी-योजनानां लाभः मिलितुं शक्नुयात्।

### समयसीमावर्धनेन आवेदकेभ्यः प्राप्स्यति साहाय्यम्

समयसीमायाः वर्धनेन तेभ्यः परिवारेभ्यः महती सहायता प्राप्स्यते ये केनापि कारणेन इदानीं यावत् आवेदनं कर्तुं न शक्नुवन् अथवा येषां प्रलेखानां सत्यापनं प्रलम्बितम् आसीत्। अतिरिक्तसमयस्य प्राप्त्या अधिकाधिकाः पात्रपरिवाराः बी.पी.एल. चयनप्रक्रियायां सम्मिलिताः भवितुं शक्ष्यन्ति, कस्यापि पात्रजनस्य लोपस्य सम्भावना अपि न्यूना भविष्यति। ग्रामीणविकासविभागेन सर्वान् मण्डलप्रशासनाविकारिणः निर्दिष्टाः यत् आवेदनप्राप्तितः आरभ्य सत्यापन- अनुशंसा-सूचीप्रकाशनं यावत् सम्पूर्णा प्रक्रिया पारदर्शिनी, समयबद्धा, सर्वकारस्य दिशा निर्देशानुकूला च सम्पादनीया। विभागेन एतदपि प्रोक्तं यत् संशोधितकार्यक्रमस्य दृढतया अनुपालनं सुनिश्चितं करणीयं, येन बी.पी.एल. चयनप्रक्रिया विना किमपि अनावश्यकविलम्बं सम्पन्ना भवेत्।

## प्रज्ञाचक्षु-गुलाबरावमहाराज-जयन्त्याः अवसरे विशेषव्याख्यानस्य आयोजनम्



**हिमसंस्कृतवार्ताः- नागपुरम्।**
कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालयस्य 'अभिनव भारती', वारङ्गा-परिसरे (नागपुरम्) प्रज्ञाचक्षु-गुलाबरावमहाराज-जयन्त्याः अवसरे एकस्य विशेषव्याख्यानस्य आयोजनं विहितम्। मुख्यवक्त्री डॉ. रेणुकाकरन्दीकरमहोदया श्रीगुलाबरावमहाराजस्य जीवनवृत्तं तस्य ग्रन्थांश्च अधिकृत्य विस्तरेण प्रकाशं चिक्षिपे। भारतीयधर्म- तत्त्वज्ञान- संस्कृति-सङ्घायस्य अधिष्ठात्री प्रो. कलापिनी-अगस्ती महोदया कार्यक्रमाय स्वकीयाः शुभाशंसाः प्रकटितवती। एवमेव 'अभिनव भारती' वारङ्गा- परिसरस्य निदेशकः प्रो. प्रसादगोखले महोदयः अपि कार्यक्रमस्य सफलायोजनाय शुभकामनाः प्रदत्तवान्। व्याख्यानात् परं सहायकप्राध्यापिकया प्रो. अमृतासोहोनीमहोदयया लिखितायाः प्रज्ञाचक्षु- गुलाबरावमहाराज-आधारितायाः "प्रज्ञायाः अमरज्योतिः" इति लघुनाटिकायाः मञ्चनं कृतम्।एम.एस.सी. योगविज्ञानस्य छात्रैः हर्षल- तृप्ति- सुनीता- अभिषेकादिभिः लघु-गुलाबस्य भूमिकां निर्वूढवत्या जियापर्वतेमहोदयया प्रभावशाल्यभिनयं प्रस्तुतम्। कार्यक्रमस्य सञ्चालनं प्रो. अमृतासोहोनी महोदयया कृतं, धन्यवादज्ञापनं प्रो. राधिकावझलवारमहोदयया विहितम्।

## २०२६ तमस्य वर्षस्य अगस्तमासस्य ३० दिनाङ्के यूनेस्को-क्लब-ऑफ-दरभङ्गा-संस्थया “राधाकृष्णरूपसज्जा-प्रतियोगिता” आयोजयिष्यते।



- **कार्यकारिणीसमितेः सभायां बहवः महत्त्वपूर्णनिर्णयाः स्वीकृताः।**
- **आगामिनि जुलैमासस्य २५ दिनाङ्के संस्कृती इण्टरनेशनल-विद्यालये, राघोपुरे, “स्वास्थ्यजागरूकताशिविरम्” आयोजयिष्यते।**

**हिमसंस्कृतवार्ता, विश्व मोहन झा, दरभंगा ।** यूनेस्को-क्लब-ऑफ-दरभङ्गा-संस्थायाः कार्यकारिणीसमितेः महत्त्वपूर्णा सभा क्लब-अध्यक्षस्य श्रीबिनोदकुमारपंसारी-महोदयस्य अध्यक्षतायां बेला-पब्लिक-विद्यालयस्य प्राङ्गणे समायोजिता। अस्मिन् अवसरे डॉ. बी. के. मिश्रः, प्रो. ब्रजमोहनमिश्रः, डॉ. गीतेन्द्रठाकुरः, डॉ. ओमप्रकाशः, प्रो. मधुरञ्जनप्रसादः, डॉ. आर. एन. चौरसिया, श्रीराघवेन्द्रकुमारः, श्रीमनोरञ्जनकुमार-अग्रवालः, डॉ. एम. एच. खान 'राजू', श्रीरतनकुमारखेरिया, श्रीश्रवणकुमारबैरोलिया, श्रीदीपककुमारसिन्हा, श्रीहीराझा, श्रीअभय-कुमारकश्यपः, श्रीअमरनाथसाहः, श्रीरामबाबूसाहः, डॉ. विनोदसाहश्च उपस्थिताः आसन्।सभायां निर्णीतं यत् आगामिनि जुलैमासस्य २५ दिनाङ्के राघोपुरस्थिते संस्कृती इण्टरनेशनल-विद्यालये “स्वास्थ्यजागरूकताशिविरम्” आयोजयिष्यते। अस्य शिविरस्य संयोजकः क्लबस्य स्वास्थ्यसमितेः अध्यक्षः डॉ. ओमप्रकाशः भविष्यति। तेन उक्तं यत् अस्मिन् शिविरे नेत्रपरीक्षणं दन्तपरीक्षणं च अपि सम्पन्नं भविष्यति।तथैव सभायां निर्णीतं यत् क्लबस्य वार्षिकेषु प्रमुखतमेषु कार्यक्रमेषु अन्यतमाया “राधाकृष्णरूपसज्जा-प्रतियोगितायाः” आयोजनं २०२६ तमस्य वर्षस्य अगस्तमासस्य ३० दिनाङ्के (रविवासरे) लहेरियासरायस्थिते दरभङ्गा-क्लबे भविष्यति। अस्यां प्रतियोगितायां दरभङ्गानगरस्य प्रायः सप्तदश विद्यालयानां छात्राः छात्राश्च सहभागिनः भविष्यन्ति।प्रतियोगितायाः आयोजनसमितेः संयोजकत्वेन श्रीराघवेन्द्रकुमारः नियुक्तः। श्रीहीराझा तथा श्रीअभयकुमारकश्यपः सदस्यरूपेण कार्यं निर्वहिष्यतः।सभायाः प्रारम्भे अध्यक्षः श्रीबिनोदकुमारपंसारी सर्वेषां सदस्यानां स्वागतं कृतवान्। अन्ते प्रधानसचिवः प्रो. मधुरञ्जनप्रसादः धन्यवादज्ञापनम् अकरोत्।

## वन्दे संस्कृतमातरम् लौकिकन्यायकोशः

# काकत्रोटिबिम्बन्यायः

काकः स्वस्यैव चञ्चु बिम्बफलं मन्यते। तथैव स्वस्यैव विषये वर्तमानम् अज्ञानं बोधयितुम् अस्य प्रयोगो भवति।
डा. वर्षा प्रकाश टोणगांवकर पुणे, महाराष्ट्रम्